॥ श्रीः ॥

## ॥ अम्बाष्टकम् ॥

चेटीभवन्निखिलकेटी कदम्बतरुवाटीषु नाकिपटली
कोटीरचारुतर कोटीमणीकिरणकोटीकरम्बितपदा ।
पाटीरगन्धिकुचशाटी कवित्वपरिपाटीमगाधिपसुता
घोटीकुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥ १

कूलातिगामिभयतूलावलिज्वलनकीला निजस्तुतिविधा
कोलाहलक्षपितकालाऽमरी कुशलकीलालपोषणनभाः ।
स्थूला कुचे जलदनीला कचे कलितलीला कदम्बविपिने
शूलायुधप्रणतिशीला विभातु हृदि शैलाधिराजतनया ॥ २

यत्राशयो लगति तत्रागजा वसतु कुत्रापि निस्तुलशुका
सुत्रामकालमुखसत्राशनप्रकरसुत्राणकारिचरणा ।
छत्रानिलातिरयपत्राभिरामगुणमित्रामरीसमवधूः
कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥ ३

द्वैपायनप्रभृतिशापायुधत्रिदिवसोपानधूलिचरणा
पापापहस्वमनुजापानुलीनजनतापापनोदनिपुणा ।
नीपालया सुरभिधूपालका दुरितकूपादुदञ्चयतु मां
रूपाधिका शिखरिभूपालवंशमणिदीपायिता भगवती ।। ४

याऽऽलीभिरात्मतनुताली सकृत्प्रियकपालीषु खेलति भय-
व्यालीनकुल्यसितचूलीभरा चरणधूलीलसन्मुनिवरा ।
वालीभृति श्रवसि तालीदलं वहति यालीकशोभितिलका
सालीकरोतु मम काली मनः स्वपदनालीकसेवनविधौ ।। ५

न्यङ्काकरे वपुषि कङ्कादिरक्तपुषि कङ्कादिपक्षिविषये
त्वं कामनामयसि किं कारणं हृदय पङ्कारिमेहि गिरिजाम् ।
शङ्काशिलानिशितटङ्कायमानपदसङ्काशमानसुमनो
झङ्कारि भृङ्गततिमङ्कानुपेतशशिसङ्काशिवक्त्रकमलाम् ।। ६

कुम्भावतीसमविडम्बा गलेन नवतुम्ब्याभवीणसविधा
शं बाहुलेयशशिबिम्बाभिराममुखसम्बाधितस्तनभरा ।
अम्बा कुरङ्गमदजम्बालरोचिरिह लम्बालका दिशतु मे
बिम्बाधरा विनतशम्बायुधादिनिकुरम्बा कदम्बविपिने ।। ७

इन्धानकीरमणिबन्धा भवे हृदयबन्धावतीव रसिका
सं धावती भुवनसन्धारणेप्यमृतसिन्धावुदारनिलया ।
गन्धानुभावमुहुरन्धालिवीतकचबन्धा समर्पयतु मे
शंधाम भानुमपि सन्धानमाशु पदसन्धानमप्यगसुता ।। ८

इति श्रीकालिदासविरचितम् अम्बाष्टकं सम्पूर्णम् ।।